॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ३२

नर्मदा पुलिने यत्र राक्षसेन्द्रः स रावणः ।
पुष्पोपहारं कुरुते तस्माद्देशाददूरतः ॥ १॥

अर्जुनो जयतां श्रेष्ठो माहिष्मत्याः पतिः प्रभुः ।
क्रीडिते सह नारीभिर्नर्मदातोयमाश्रितः ॥ २॥

तासां मध्यगतो राज रराज स ततोऽर्जुनः ।
करेणूनां सहस्रस्य मध्यस्थ इव कुञ्जरः ॥ ३॥

जिज्ञासुः स तु बाहूनां सहस्रस्योत्तमं बलम् ।
रुरोध नर्मदा वेगं बाहुभिः स तदार्जुनः ॥ ४॥

कार्तवीर्यभुजासेतुं तज्जलं प्राप्य निर्मलम् ।
कूलापहारं कुर्वाणं प्रतिस्रोतः प्रधावति ॥ ५॥

समीननक्रमकरः सपुष्पकुशसंस्तरः ।
स नर्मदाम्भसो वेगः प्रावृड्काल इवाबभौ ॥ ६॥

स वेगः कार्तवीर्येण सम्प्रेषिट इवाम्भसः ।
पुष्पोपहारं तत्सर्वं रावणस्य जहार ह ॥ ७॥

रावणोऽर्धसमाप्तं तु उत्सृज्य नियमं तदा ।
नर्मदां पश्यते कान्तां प्रतिकूलां यथा प्रियाम् ॥ ८॥

पश्चिमेन तु तं दृष्ट्वा सागरोद्गारसंनिभम् ।
वर्धन्तमम्भसो वेगं पूर्वामाशां प्रविश्य तु ॥ ९॥

ततोऽनुदभ्रान्तशकुनां स्वाभाव्ये परमे स्थिताम् ।
निर्विकाराङ्गनाभासां पश्यते रावणो नदीम् ॥ १०॥

सव्येतरकराङ्गुल्या सशब्दं च दशाननः ।
वेगप्रभवमन्वेष्टुं सोऽदिशच्छुकसारणौ ॥ ११॥

तौ तु रावणसन्दिष्टौ भ्रातरौ शुकसारणौ ।
व्योमान्तरचरौ वीरौ प्रस्थितौ पश्चिमोन्मुखौ ॥ १२॥

अर्धयोजनमात्रं तु गत्वा तौ तु निशाचरौ ।
पश्येतां पुरुषं तोये क्रीडन्तं सह योषितम् ॥ १३॥

बृहत्सालप्रतीकशं तोयव्याकुलमूर्धजम् ।
मदरक्तान्तनयनं मदनाकारवर्चसं ॥ १४॥

नदीं बाहुसहस्रेण रुन्धन्तमरिमर्दनम् ।
गिरिं पादसहस्रेण रुन्धन्तमिव मेदिनीम् ॥ १५॥

बालानां वरनारीणां सहस्रेणाभिसंवृतम् ।
समदानां करेणूनां सहस्रेणेव कुञ्जरम् ॥ १६॥

तमद्भुततमं दृष्ट्वा राक्षसौ शुकसारणौ ।
संनिवृत्तावुपागम्य रावणं तमथोचतुः ॥ १७॥

बृहत्सालप्रतीकाशः कोऽप्यसौ राक्षसेश्वर ।
नर्मदां रोधवद्बद्ध्वा क्रीडापयति योषितः ॥ १८॥

तेन बाहुसहस्रेण संनिरुद्धजला नदी ।
सागरोद्गारसङ्काशानुद्गारान्सृजते मुहुः ॥ १९॥

इत्येवं भाषमाणौ तौ निशम्य शुकसारणौ ।
रावणोऽर्जुन इत्युक्त्वा उत्तस्थौ युद्धलालसः ॥ २०॥

अर्जुनाभिमुखे तस्मिन्प्रस्थिते राक्षसेश्वरे ।
सकृदेव कृतो रावः सरक्तः प्रेषितो घनैः ॥ २१॥

महोदरमहापार्श्वधूम्राक्षशुकसारणैः ।
संवृतो राक्षसेन्द्रस्तु तत्रागाद्यत्र सोऽर्जुनः ॥ २२॥

नातिदीर्घेण कालेन स ततो राक्षसो बली ।
तं नर्मदा ह्रदं भीममाजगामाञ्जनप्रभः ॥ २३॥

स तत्र स्त्रीपरिवृतं वाशिताभिरिव द्विपम् ।
नरेन्द्रं पश्यते राजा राक्षसानां तदार्जुनम् ॥ २४॥

स रोषाद्रक्तनयनो राक्षसेन्द्रो बलोद्धतः ।
इत्येवमर्जुनामात्यानाह गम्भीरया गिरा ॥ २५॥

अमात्याः क्षिप्रमाख्यात हैहयस्य नृपस्य वै ।

युद्धार्थं समनुप्राप्तो रावणो नाम नामतः ॥ २६ ॥

रावणस्य वचः श्रुत्वा मन्त्रिणोऽथार्जुनस्य ते ।
उत्तस्थुः सायुधास्तं च रावणं वाक्यमब्रुवन् ॥ २७ ॥

युद्धस्य कालो विज्ञातः साधु भोः साधु रावण ।
यः क्षीबं स्त्रीवृतं चैव योद्धुमिच्छामि नो नृपम् ।
वाशितामध्यगं मत्तं शार्दूल इव कुञ्जरम् ॥ २८ ॥

क्षमस्वाद्य दशग्रीव उष्यतां रजनी त्वया ।
युद्धश्रद्धा तु यद्यस्ति श्वस्तात समरेऽर्जुनम् ॥ २९ ॥

यदि वापि त्वरा तुभ्यं युद्धतृष्णासमावृता ।
निहत्यास्मांस्ततो युद्धमर्जुनेनोपयास्यसि ॥ ३० ॥

ततस्ते रावणामात्यैरमात्याः पार्थिवस्य तु ।
सूदिताश्चापि ते युद्धे भक्षिताश्च बुभुक्षितैः ॥ ३१ ॥

ततो हलहलाशब्दो नर्मदा तिर आबभौ ।
अर्जुनस्यानुयात्राणां रावणस्य च मन्त्रिणाम् ॥ ३२ ॥

इषुभिस्तोमरैः शूलैर्वज्रकल्पैः सकर्षणैः ।
सरावणानर्दयन्तः समन्तात्समभिद्रुताः ॥ ३३ ॥

हैहयाधिपयोधानां वेग आसीत्सुदारुणः ।
सनक्रमीनमकरसमुद्रस्येव निस्वनः ॥ ३४ ॥

रावणस्य तु तेऽमात्याः प्रहस्तशुकसारणाः ।
कार्तवीर्यबलं क्रुद्धा निर्दहन्त्यग्नितेजसः ॥ ३५ ॥

अर्जुनाय तु तत्कर्म रावणस्य समन्त्रिणः ।
क्रीडमानाय कथितं पुरुषैर्द्वाररक्षिभिः ॥ ३६ ॥

उक्त्वा न भेतव्यमिति स्त्रीजनं स ततोऽर्जुनः ।
उत्ततार जलात्तस्माद्गजातोयादिवाञ्जनः ॥ ३७ ॥

क्रोधदूषितनेत्रस्तु स ततोऽर्जुन पावकः ।
प्रजज्वाल महाघोरो युगान्त इव पावकः ॥ ३८ ॥

स तूर्णतरमादाय वरहेमाङ्गदो गदाम् ।
अभिद्रवति रक्षांसि तमांसीव दिवाकरः ॥ ३९ ॥

बाहुविक्षेपकरणां समुद्यम्य महागदाम् ।
गारुणं वेगमास्थाय आपपातैव सोऽर्जुनः ॥ ४० ॥

तस्य मर्गं समावृत्य विन्ध्योऽर्कस्येव पर्वतः ।
स्थितो विन्ध्य इवाकम्प्यः प्रहस्तो मुसलायुधः ॥ ४१ ॥

ततोऽस्य मुसलं घोरं लोहबद्धं मदोद्धतः ।
प्रहस्तः प्रेषयन्क्रुद्धो ररास च यथाम्बुदः ॥ ४२ ॥

तस्याग्रे मुसलस्याग्निरशोकापीडसंनिभः ।
प्रहस्तकरमुक्तस्य बभूव प्रदहन्निव ॥ ४३ ॥

आधावमानं मुसलं कार्तवीर्यस्तदार्जुनः ।
निपुणं वञ्चयामास सगदो गजविक्रमः ॥ ४४ ॥

ततस्तमभिदुद्राव प्रहस्तं हैहयाधिपः ।
भ्रामयाणो गदां गुर्वीं पञ्चबाहुशतोच्छ्रयाम् ॥ ४५ ॥

तेनाहतोऽतिवेगेन प्रहस्तो गदया तदा ।
निपपात स्थितः शैलो वज्रिवज्रहतो यथा ॥ ४६ ॥

प्रहस्तं पतितं दृष्ट्वा मारीचशुकसाअरंआ ।
समहोदरधूम्राक्षा अपसृप्ता रणाजिरात् ॥ ४७ ॥

अपक्रान्तेष्वमात्येषु प्रहस्ते च निपातिते ।
रावणोऽभ्यद्रवत्तूर्णमर्जुनं नृपसत्तमम् ॥ ४८ ॥

सहस्रबाहोस्तद्युद्धं विंशद्बाहोश्च दारुणम् ।
नृपराक्षसयोस्तत्र आरब्धं लोमहर्षणम् ॥ ४९ ॥

सागराविव सङ्क्षुब्धौ चलमूलाविवाचलौ ।
तेजोयुक्ताविवादित्यौ प्रदहन्ताविवानलौ ॥ ५० ॥

बलोद्धतौ यथा नागौ वाशितार्थे यथा वृषौ ।
मेघाविव विनर्दन्तौ सिंहाविव बलोत्कटौ ॥ ५१ ॥

रुद्रकालाविव क्रुद्धौ तौ तथा राकसार्जुनौ ।
परस्परं गदाभ्यां तौ ताडयामासतुर्भृशम् ॥ ५२ ॥

वज्रप्रहारानचला यथा घोरान्विषेहिरे ।
गदाप्रहारांस्तद्वत्तौ सहेते नरराक्षसौ ॥ ५३ ॥

यथाशनिरवेभ्यस्तु जायते वै प्रतिश्रुतिः ।
तथा ताभ्यां गदापातैर्दिशः सर्वाः प्रतिश्रुताः ॥ ५४ ॥

अर्जुनस्य गदा सा तु पात्यमानाहितोरसि ।
काञ्चनाभं नभश्चक्रे विद्युत्सौदामनी यथा ॥ ५५ ॥

तथैव रावणेनापि पात्यमाना मुहुर्मुहुः ।

अर्जुनोरसि निर्भाति गदोल्केव महागिरौ ॥ ५६ ॥

नार्जुनः खेदमाप्नोति न राक्षसगणेश्वरः ।
सममासीत्तयोर्युद्धं यथा पूर्वं बलीन्द्रयोः ॥ ५७ ॥

शृङ्गैर्महर्षभौ यद्वद्दन्ताग्रैरिव कुञ्जरौ ।
परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ ॥ ५८ ॥

ततोऽर्जुनेन क्रुद्धेन सर्वप्राणेन सा गदा ।
स्तनयोरन्तरे मुक्ता रावणस्य महाहवे ॥ ५९ ॥

वरदानकृतत्राणे सा गदा रावणोरसि ।
दुर्बलेव यथा सेना द्विधाभूतापतत्क्षितौ ॥ ६० ॥

स त्वर्जुनप्रमुक्तेन गदापातेन रावणः ।
अपासर्पद्धनुर्मात्रं निषसाअद च नि स् तनन् ॥ ६१ ॥

स विह्वलं तदालक्ष्य दशग्रीवं ततोऽर्जुनः ।
सहसा प्रतिजग्राह गरुत्मानिव पन्नगम् ॥ ६२ ॥

स तं बाहुसहस्रेण बलाद्गृह्य दशाननम् ।
बबन्ध बलवान्राजा बलिं नारायणो यथा ॥ ६३ ॥

बध्यमाने दशग्रीवे सिद्धचारणदेवताः ।
साध्वीति वादिनः पुष्पैः किरन्त्यर्जुनमूर्धनि ॥ ६४ ॥

व्याघ्रो मृगमिवादाय सिंहराड् इव दन्तिनम् ।
ररास हैहयो राजा हर्षादम्बुदवन्मुहुः ॥ ६५ ॥

प्रहस्तस्तु समाश्वस्तो दृष्ट्वा बद्धं दशाननम् ।
सह तै राकसैः क्रुद्ध अभिदुद्राव पार्थिवम् ॥ ६६ ॥

नक्तञ्चराणां वेगस्तु तेषामापततां बभौ ।
उद्भूत आतपापाये समुद्राणामिवाद्भुतः ॥ ६७ ॥

मुञ्च मुञ्चेति भाषन्तस्तिष्ठ तिष्ठेति चासकृत् ।
मुसलानि च शूलानि उत्ससर्जुस्तदार्जुने ॥ ६८ ॥

अप्राप्तान्येव तान्याशु असम्भ्रान्तस्तदार्जुनः ।
आयुधान्यमरारीणां जग्राह रिपुसूदनः ॥ ६९ ॥

ततस्तैरेव रक्षांसि दुर्धरैः प्रवरायुधैः ।
भित्त्वा विद्रावयामास वायुरम्बुधरानिव ॥ ७० ॥

राक्षसांस्त्रासयित्वा तु कार्तवीर्यार्जुनस्तदा ।
रावणं गृह्य नगरं प्रविवेश सुहृद्वृतः ॥ ७१ ॥

स कीर्यमाणः कुसुमाक्षतोत्करैर्
द्विजैः सपौरैः पुरुहूतसंनिभः ।
तदार्जुनः सम्प्रविवेश तां पुरीं
बलिं निगृह्यैव सहस्रलोचनः ॥ ७२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com